श्रूयमाणः पूर्ववाक्यार्थमेव समुच्चिनोति 'तत्र भव.' (४.३.५३/१४२८) इति। सुपां व्याख्यानः[1] सौपो [2]ग्रन्थः। तैङः। [3]कार्त्तः। सुप्सु भवं सौपम्। तैङम्। कार्तम्। व्याख्यातव्यनाम्नः इति किम्? पाटलिपुत्रस्य व्याख्यानी सुकोशला, पाटलिपुत्रः सुकोशलया व्याख्यायते, [4]एवंसंनिवेशं पाटलिपुत्रम् इति, न [5]तु [6]पाटलिपुत्रो व्याख्यातव्यनाम। भवव्याख्यानयोर्युगपदधिकारोऽपवादविधानार्थः (म.भा. २.३११)। कृतनिर्देशौ हि तौ॥

## बह्वचोऽन्तोदात्ताट्ठञ्। (६७/१४४६)

बह्वचो व्याख्यातव्यनाम्नः प्रातिपदिकाद् अन्तोदात्ताद् भवव्याख्यानयोः[7] ठञ् प्रत्ययो भवति। अणोऽपवादः। [8]षात्वणत्विकम्। [9]नातानतिकम्। समासस्वरेणान्तोदात्ताः प्रकृतयः। बह्वचः इति किम्? द्व्यचः ठकं (४.३.७२/१४५१) वक्ष्यति। एकाच् प्रत्युदाह्रियते। सौपम्। तैङम्। [10]कार्तम्। अन्तोदात्तात् इति किम्? संहितायाः[11] सांहितम्। संहिताशब्दो हि गतिस्वरेणाद्युदात्तः॥

## क्रतुयज्ञेभ्यश्च। (६८/१४४७)

क्रतुभ्यो यज्ञेभ्यश्च व्याख्यातव्यनामभ्यः [12]प्रातिपदिकेभ्यः भवव्याख्यानयोरर्थयोः ठञ् प्रत्ययो भवति। अणोऽपवादः। क्रतुभ्यस्तावत् – अग्निष्टोमस्य [13]व्याख्यानः, तत्र भवः आग्निष्टोमिकः। [14]वाजपेयिकः। राजसूयिकः (म.भा. २.३१२)। यज्ञेभ्यः – पाकयज्ञिकः। [15]नावयज्ञिकः। अनन्तोदात्तार्थ आरम्भः। क्रतुभ्यः इत्येव सिद्धे यज्ञग्रहणमसोमयागेभ्योऽपि यथा स्यात्[16]। पाञ्चौदनिकः। [17]दाशौदनिकः। बहुवचनं स्वरूपविधिनिरासार्थम्॥

## अध्यायेष्वेवर्षेः। (६९/१४४८)

ऋषिशब्दाः [18]प्रवरनामधेयानि, तेभ्यः ऋषिशब्देभ्यो भवव्याख्यानयोः अर्थयोः ठञ् प्रत्ययो भवति [19]अणोऽपवादः अध्यायेष्वेव [20]प्रत्ययार्थे विशेषणेषु। व्याख्यातव्यनाम्नः इत्यनुवर्तते, तत्साहचर्याद् [21]ऋषिशब्दैर्ग्रन्थ उच्यते। वसिष्ठस्य [22]व्याख्यानः तत्र भवो [23]वा वासिष्ठिकोऽध्यायः। [24]वैश्वामित्रिकः। अध्यायेषु इति किम्? वासिष्ठी ऋक्[25]॥

## पौराडाशपुरोडाशात् ष्ठन्। (७०/१४४९)

पौराडाशशब्दात् पुरोडाशशब्दाच्च भवव्याख्यानयोरर्थयोः ष्ठन् प्रत्ययो भवति। पुरोडाशाः पिष्टपिण्डाः, तेषां संस्कारको मन्त्रः पौरोडाशः, तस्य [26]व्याख्यानः तत्र भवो वा पौरोडाशिकः, पौरोडाशिकी। पुरोडाशसहचरितो [27]ग्रन्थः पुरोडाशः, तस्य [28]व्याख्यानस्तत्र भवो वा पुरोडाशिकः, पुरोडाशिकी[29]। षकारो ङीषर्थः॥

---

1. ग्रन्थः इत्यधिकम् क. 2. ग्रन्थः नास्ति फ, सौपं तैङम् कार्तम् ड, तैङः कार्तः नास्ति फ. 3. कार्क्षः ब. 4. एवं निवेशं ब. 5. च ड. 6. पाटलिपुत्रशब्दः ब.क.ड.इ.फ. 7. अर्थयोः इत्यधिकम् ड, अर्थे इत्यधिकम् ह. 8. षत्वणत्वयोः व्याख्यानग्रन्थः इत्यधिकम् फ. 9. नातानतिकम् नास्ति ब, तात्वलत्विकम् ग. 10. नास्ति फ. 11. व्याख्यानं इत्यधिकम् ड, संहितायां भवं सांहितम् ह. 12. प्रातिपदिकेभ्यः नास्ति ब. 13. व्याख्यानम् ड.इ.फ. 14. नास्ति ब. 15. नास्ति फ.ह. 16. इति इत्यधिकम् ब.क.इ. 17. नास्ति ड. 18. प्रवर नास्ति फ. 19. अणोऽपवादः नास्ति फ. 20. प्रत्ययार्थविशेषणेषु ब.क.इ.ह. 21. ऋषिशब्देन ड. 22. व्याख्यानं ड. 23. वा नास्ति ब. फ. 24. वैश्वामित्री ड. 25. इति वर्तते इत्यधिकम् फ. 26. व्याख्यानं ड. 27. मन्त्रः ड.ह. 28. व्याख्यानं ड. 29. इति इत्यधिकम् ह.